# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–नवम्बर/दिसम्बर–२०१६

| | | |
|---|---|---|
| **कक्षा – शास्त्रीप्रथम, सेमेस्टर–१** | **प्रश्नपत्रम् – ८** | **गुणाः – ७०** |
| **विषयः – धर्मशास्त्र** | **कोड – CE-1.1.2** | **समयः – ०३–०६** |
| **दिनाङ्कः – १४.१२.२०१६** | **ग्रन्थः – मनुस्मृतिः प्रथमद्वितीयाध्यायौ** | |

---

**प्रथमान्वितिः ( युनिट – १ )**

**प्रश्नः १ प्रदत्तेषु द्वयोः श्लोकयोः व्याख्या कार्या ।** **०८**

*(१) आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।*
*ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ॥*

*(२) तमोऽयं तु समाश्रित्य चिरं तिष्ठति सेन्द्रियः ।*
*न च स्वं कुरुते कर्म तदोत्क्रामति मूर्तितः ॥*

*(३) अहोरात्रे विभजते सूर्यो मानुषदैविके ।*
*रात्रिः स्वप्नाय भूतानां चेष्टायै कर्मणामहः ॥*

**प्रश्नः २** *(१) जगदुत्पत्तिकथां यता ग्रन्थं प्रतिपादयत ।* **०८**

*अथवा*

*(२) ब्राह्मणादिवर्णाः तेषां कार्याणि च सविस्तारेण लिखत ।*

**प्रश्नः ३ द्वयोः विवेचनं कुरुत ।** **०४**

*(१) आचारः परमो धर्मः ।* *(२) जगत्प्रलयः ।*
*(३) ब्रह्मणः प्रागट्यम् ।* *(४) जलसृष्टिः ।*

**प्रश्नः ४ केषाञ्चित् पञ्चानाम् लघूत्तराणि देयानि ।** **०५**

*(१) मनुस्मृतौ प्रथमाऽध्याये कति श्लोकाः सन्ति ?*
*(२) कः अहोरात्रे विभजते ?*
*(३) कः परमो धर्मः ?*
*(४) ब्रह्मणः मुखात् कस्योत्त्पत्ति जाता ?*
*(५) ''मनुस्मृतिः'' इत्यत्र कः समासः ?*
*(६) मनुस्मृतेः प्रथमाऽध्यायस्य नाम किम् ?*
*(७) कति वर्षात्मकं देवानां युगमुच्यते ?*

**द्वितीयान्वितिः ( युनिट – २ )**

**प्रश्नः ५ द्वयोः कारिकयोः ससन्दर्भ व्याख्या कार्या ।** **०८**

*(१) वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।।*
*आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥*

*(२) केशान्तिको ब्राह्मणस्य दण्डः कार्य प्रमाणतः ।*
*ललाटसंमितो राज्ञः स्यात्तु नासान्तिको विशः ॥*

*(३) एकाक्षरं परं ब्रह्म प्राणायामाः परं तपः ।*
*सावित्र्यास्तु परं नास्ति मौनात्सत्यं विशिष्यते ॥*

**प्रश्नः ६** **कस्याप्येकस्योत्तरं सविस्तारेण दीयताम् ।** **०८**

(१) *उपनयनसंस्कारः ग्रन्थोक्तदिशा समहत्त्वं वर्णयत ।*

(२) *जातकर्मनामकरणसंस्कारयोः विवेचनं कुरुत ।*

**प्रश्नः ७** **एकस्य टिप्पणी कार्या ।** **०२**

*(१) धर्मलक्षणम् ।* *(२) वेदाध्ययन विधिः ।*

**प्रश्नः ८** **द्वयोः लघूत्तरं लिखत ।** **०२**

*(१) नित्यं पूजितं अन्नं किं यच्छति ?*

*(२) अन्नप्राशनसंस्कारः कदा कर्तव्यः ?*

*(३) राज्ञैः (क्षत्रियैः) यज्ञोपवितसंस्कारः कदा कर्तव्यः ?*

## तृतीयान्वितिः ( युनिट - ३ )

**प्रश्नः ९** **यथेच्छं द्वयोः पद्ययोः व्याख्या कार्या ।** **०८**

(१) *निषेकादीनि कर्माणि यः करोति यथा विधि ।*
*संभावयति चान्नेन स विप्रो गुरुरुच्यते ॥*

(२) *मात्रास्वस्रा दुहित्रा वा न विविक्तासनो भवेत् ।*
*बलवानिन्द्रियग्रामो विद्वांसमपि कर्षतिः ॥*

(३) *आचार्यो ब्राह्मणो मूर्तिः पितामूर्तिः प्रजापतेः ।*
*माता पृथिव्या मूर्तिस्तु भ्राता स्वो मूर्तिरात्मनः ॥*

**प्रश्नः १०** *(१) ब्रह्मचारीधर्माः सविस्तारेण प्रतिपादयत ।* **०८**

*अथवा*

*(२) वेदाध्ययनमहत्त्वं नियमाः च यथाग्रन्थं वर्णयत ।*

**प्रश्नः ११** **प्रदत्तेषु द्वयोः टिप्पणी लेख्या ।** **०४**

*(१) भिक्षामाहात्म्यम् ।* *(२) गुरुसेवाफलम् ।*

*(३) उपाध्यायलक्षणम् ।* *(४) आचार्यलक्षणम् ।*

**प्रश्नः १२** **पञ्चानां लघूत्तराणि लिखत ।** **०५**

*(१) केषां शुश्रूषा परमं तप उच्यते ?*

*(२) सुभाषितम् कस्माद् ग्राह्यम् ?*

*(३) मनुस्मृतौ कति अध्यायाः सन्ति ?*

*(४) मनुस्मृतौ द्वितीये अध्याये कति श्लोकाः सन्ति ?*

*(५) ब्रह्मचारीधर्माः किस्मिन्नध्याये वर्णिताः सन्ति ?*

*(६) ब्राह्मणेन केशान्तसंस्कारः कतमे वर्षे कर्तव्यः ?*

*(७) उपनयने केशान्तिकः दण्डः कस्य भवति ?*

=०=